सरादर्व्वागेकोद्दिष्टं न पार्व्वणम्" इति धवलनिबन्धवाक्यात् । "माता चैव तथा भ्राता भार्य्या पुत्रस्तथा स्नुषा । एषां मृतौ चरेच्छ्राद्धमन्यस्य न पुनः पितुः" इति भृगुवचनं भिन्नदिनमरणेऽपि पितुर्म्मृतावन्यस्य सपिण्डनं न कार्य्यमेषामेव कार्य्यमित्येतत्परमिति नि०सि०। "पितर्य्युपरते पुत्रो मातुः श्राद्धान्निवर्त्तते । मातर्य्यपि च वृत्तायां पितृश्राद्धादृते समाम्" माध० वृह० वचनन्तु वार्षिकश्राद्धपरम् मातुः कृते इत्याकर्षः मातरं पितरं च विना अन्यस्य श्राद्धात् वार्षिकश्राद्धात् समां व्याप्य निवर्त्तते इत्यर्थः । "अन्यश्राद्धं परान्नञ्च गन्धमाल्यञ्च मैथुनम् । वर्ज्जयेद्गुरुपाते तु यावत् पूर्णो न वत्सरः" देवलवचने अन्यपदं भृगुवचनोक्तमात्रादिभिन्नपरम् । अन्नपदञ्च स्विन्नान्नपरं "भिक्षोऽस्त्री भक्तमन्धोऽन्नमित्यमरोक्तेः 'स्विन्नमन्नमुदाहृतम्" इत्युक्तेश्च न तु परस्वामिकामान्नमात्रपरम् अन्नशब्देन रूढ्या परिभाषया च सिद्धान्नस्यैव झटित्युपस्थापकत्वात् आमान्नस्य लक्ष्यार्थतया विलम्बेनोपस्थितेश्च । एवमेवाचारः 'विशेषतः शिवापूजां प्रमीतपितृको नरः । यावत् वत्सरपर्य्यन्तं मनसाऽपि न चिन्तयेत्" कालिकापु० वाक्यं वार्षिकदुर्गापूजाविषयं नित्यपूजायाः कर्त्तव्यतायाः दशाहमध्येऽपि प्रागुक्तेः । "द्वयोरेव महागुर्व्वोरब्दमेकमशौचकम् । नान्येषामधिकाशौचं स्वजातिविहितात् किलेति" श्राद्धकौ०धृतजातू० वचनं तु पुरुषविषयम् । स्त्रीणां भर्त्तुर्महागुरुतायाः सर्व्वसम्मतत्वेन तन्मरणे अधिकाशौचस्योचितत्वात् अतएव 'महागुरुविपत्तिषु इत्यादिना सामान्यतो बहुवचनमुपात्तम्। "गयाश्राद्धं मृतानां तु पूर्णे त्वब्दे प्रशस्यते" हेमा०भवि०पु० । तीर्थश्राद्धं गयाश्राद्धम् श्राद्धमन्यच्च पैतृकम् । अब्दमध्ये न कुर्वीत महागुरुविपत्तिषु त्रिस्थ० गरु० पु० । इदं वृद्ध्यर्थसपिण्डनाभावे । वृद्धौ सपिण्डनापकर्षे तु वर्षमध्येऽपि दर्शादिकं कार्य्यमेव "पितुः सपिण्डनं कृत्वा कुर्य्यान्मासानुमासिकम्" छन्दोगप०वचनात् "सपिण्डीकरणादूर्द्ध्वं नरः पार्व्वणभुग्भवेत्" मात्स्यात् "ततः प्रभृति वै प्रेतः पितृसामान्यमश्नुते । विन्दते पितृलोकं च ततः श्राद्धं प्रवर्त्तते" इति हारीतवचनाच्चेति शूलपाणिः । "उद्वाहश्चोपनयनं प्रथमेऽब्दे महीपते ! । कृते सपिण्डनेऽप्यूर्द्ध्वमस्थ्नां चोद्धरणं त्यजेत् । तथापि कर्त्तुमिच्छन्ति त्रीणि चैतानि वै सुताः । मासिकान्यवशिष्टानि चापकृष्य चरेत् पुनः" ब्रह्म वै०पु० । अत्रेदं बोध्यं वृद्धिं विना कुलधर्म्मैकपुत्रत्वादिवशतः वर्षमध्ये सपिण्डनापकर्षेऽपि पितृत्वप्राप्तिर्वर्षान्त एव "कृते सपिण्डीकरणे नरः संवत्सरात् परम् । प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते" विष्णु ध०उक्तेः "अर्व्वाक् संवत्सराद्यस्य सपिण्डीकरणं भवेत् । प्रेतत्वमपि तस्यापि विज्ञेयं वत्सरं नृप !" इत्यग्निपु०उक्तेश्च। तेन एतद्विषये महागुरूणां प्रेतत्वसत्त्वेन विवाहोपनयनादौ दैवपैत्रेषु च नाधिकारः वृद्धिनिमित्ते सपिण्डने संवत्सरमप्राप्यापि प्रेतत्वविमुक्तिस्तेन सर्व्वत्राधिकारः । "अर्व्वाक् संवत्सराद्वृद्धौ पूर्णे संवत्सरेऽपि वा । ये सपिण्डीकृताः प्रेता न तेषां च पृथक्क्रिया" शाता० वाक्ये पूर्णवत्सरस्येव वृद्ध्यारम्भकालस्यापि प्रेतत्वविमोचनहेतुत्वोक्तेः तथात्वम् । यतः सपिण्डीकृता अतो न प्रेताः प्रेतपदप्रतिपाद्या विमुक्तप्रेतभावा इत्यर्थः । तत्र विशेषः । "अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपाक्षिकम् । प्रथमेऽब्देऽपि कुर्वीत यदि स्याद्भक्तिमान् सुतः" मदनपारिजातधृतवचनम् । "भक्तिमान् भक्त्याख्यश्राद्धकारीति मदनपारिजातादयः ।'भक्तिश्राद्धं तु त्रिस्थलीसेतौ उक्तम् तच्च गयाश्राद्धादिपद्धतौ अस्माभिर्दर्शितं तत एवावगन्तव्यम् । एवं मृताशौचमपि कर्म्मविशेषानर्हत्वप्रयोजकम् । विवरणं मृताशौचशब्दे" ग्रहणेऽशौचं ग्रहणशब्दे वक्ष्यते । रजस्वलाशौचन्तु अशुद्धिशब्दे उक्तप्रायम् । 'अपाटवाद्यशौचाद्यैर्यदि विघ्नं प्रजायते । तदशौचे व्यतीते तु तेषां श्राद्धं विधीयते" तिथि०त० स्मृतिः ।

**अशौचसङ्कर** अशौचयोः सङ्करः । जननमरणाशौचयोर्मध्ये पुनर्जननामरणाशौचयोः पातेन जनिते अशौचविशेषे । तत्कालभेदो यथा जननाशौचमध्ये जननाशौचान्तरपाते पूर्व्वाशौचकालेन शुद्धिः । पूर्णाशौचान्त्यदिने पूर्णाशौचान्तरपाते अन्तिमदिनोत्तरदिनद्वयेन शुद्धिः । अन्तिमदिवसोत्तरप्रभाते सूर्य्योदयात् पूर्व्वं तत्पाते सूर्य्योदयावधिदिनत्रयेण शुद्धिः । एवं मरणाशौचेऽपि । वर्द्धितदिनद्वयत्रयाभ्यन्तरे अशौचान्तरपाते पूर्व्वेणैव शुद्धिः। अशौचत्रितयान्तकृत्यमेकदैव । तद्द्वितीयदिनकृत्यं तत्परदिने । अत्र दशमदिनतत्प्रभातयोः पितृमातृभर्त्तृमरणे तु न दिनद्वयत्रयाच्छुद्धिः किन्तु स्वावधेरेव सम्पूर्णाशौचमिति । ज्ञातिजननाशौचमध्ये स्वपुत्रजनने पूर्व्वार्द्धे पूर्व्वेण, परार्द्धे परेण शुद्धिः । एवं ज्ञातिमरणमध्ये पितृमातृभर्तृमरणे पूर्व्वार्द्धे पूर्व्वाशौचकालेन, परार्द्धे पित्राद्यशौचकालेन शुद्धिः। स्वपुत्रजननाशौचान्तिमदिनतत्प्रभातयोर्ज्ञाति-